# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – २** | **प्रश्नपत्रम् – ४** | **गुणाः – ५०** |
| **विषयः – रामानुजवेदान्तः** | **सत्रम् – ४** | **समयः – १० तः १२** |
| **दिनाङ्कः – १६/०७/२०२१** | **सन्दर्भग्रन्थः – बृहदारण्यकोपनिषत् (रङ्गरामानुजभाष्यसहिता)** | |

**सूचना - निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः उत्तरं लिखत।**

१ 'स वा अयमात्मा सर्वेषां भूतानामधिपतिः सर्वेषां भूतानां राजा' इतीमं मन्त्रं भाष्यानुगुणं व्याख्यात।

२ 'द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं च' इतीमं मन्त्रं यथाभाष्यं विवेचयत।

३ सङ्क्षेपेण चतुर्थाध्यायस्य षष्ठवंशब्राह्मणस्य सारभागं सङ्गृह्णीत।

४ चतुर्थब्राह्मणोक्तदिशा विविधदृष्टान्तपुरस्सरं सर्वस्य ब्रह्मात्मकत्वं प्रतिपादयत।

**प्रश्नः २** परब्रह्मणः परमात्मनः मूर्तामूर्तात्मकं शरीरद्वयं भाष्यानुगुणं परिचाययत।

**प्रश्नः ३** बृहदारण्यकोपनिषदः चतुर्थब्राह्मणोक्तं याज्ञवल्क्यमैत्रेयीसंवादं विवृणुत।

**प्रश्नः ४** बृहदारण्यकोपनिषदः चतुर्थाध्यायस्य पञ्चमब्राह्मणे प्रोक्तां मधुविद्यामुपवर्णयत।

**प्रश्नः ५** मधुविद्यायाः स्तुत्यर्थं प्रोक्ताम् आख्यायिकां यथाभाष्यम् उपदर्शयत।

**प्रश्नः ६ अधोलिखितेषु द्वयोः उत्तरं लिखत।**

१ 'यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य शरीरम्।
यः पृथिवीमन्तरो यमयति एष त आत्माऽन्तर्याम्यमृतः॥' इतीमं मन्त्रं भाष्यानुसारं व्याख्यात।

२ 'एतस्य वा अक्षरस्य प्रशासने गार्गि! सूर्याचन्द्रमसौ विधृतौ तिष्ठतः.....॥' मन्त्रमिमं यथाग्रन्थम् उपवर्णयत।

३ अन्तर्यामिब्राह्मणानुसारं परमपुरुषस्य सर्वेषु सूत्रनियन्तृत्वमुपपादयत।

४ 'आकाशः कस्मिन् ओतः प्रोतश्च' इति पञ्चमाध्यायस्य अष्टमब्राह्मणमाधारीकृत्य स्पष्टयत।

**प्रश्नः ७** याज्ञवल्क्यगार्गीसंवादं पञ्चमाध्यायस्य षष्ठब्राह्मणानुगुणं व्याकुरुत ।

**प्रश्नः ८** पञ्चमाध्यायस्य सप्तमब्राह्मणस्य सारभागं यथाग्रन्थम् उपपादयत ।

**प्रश्नः ९** सप्तमाध्यायस्य द्वितीयब्राह्मणे प्रोक्ताम् आख्यायिकां यथाग्रन्थमुपवर्णयत ।

**प्रश्नः १०** अष्टमाध्यायस्य द्वितीयब्राह्मणे उपदिष्टां पञ्चाग्निविद्यां यथाभाष्यं व्याकुरुत ।

**प्रश्नः ११ दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ बृहदारण्यकोपनिषदि कति अध्यायाः सन्ति ?
२ बृहदारण्यकोपनिषदः चतुर्थाध्यायस्य तृतीयब्राह्मणस्य नाम किम् ?
३ 'अथात आदेशो नेति नेति' इत्यत्रोक्तस्य 'आदेशः' इति शब्दस्य कोऽर्थः ?
४ बृहदारण्यकोपनिषदः चतुर्थाध्यायस्य चतुर्थब्राह्मणस्य नाम किम् ?
५ याज्ञवल्क्यमहर्षेः कति पत्न्यः सन्ति ?
६ मधुविद्या कस्याम् उपनिषदि प्रोक्ता ?
७ 'इन्द्रो मायाभिः पुरुरूप ईयते' इत्यत्र इन्द्रशब्दवाच्यः कः ?
८ बृहदारण्यकोपनिषदः पञ्चमाध्यायस्य चतुर्थब्राह्मणस्य नाम किम् ?
९ याज्ञवल्क्यगार्गीसंवादः पञ्चमाध्यायस्य कस्मिन् ब्राह्मणे वर्तते ?
१० प्रजापतिलोकाः कुत्र ओताः प्रोताश्च ?
११ पञ्चमाध्यायस्य सप्तमब्राह्मणस्य किं नामधेयमस्ति ?
१२ 'सन्दृब्धानि' इति शब्दस्य कोऽर्थः ?
१३ गार्गी कस्मिन् गोत्रे उत्पन्ना आसीत् ?
१४ पञ्चमाध्यायस्य अन्तर्यामिब्राह्मणे केन प्रश्नः पृष्टः ?
१५ ब्रह्मणः कति रूपाणि सन्ति ?

****